**Indian Journal of Modern Research and Reviews**

**This Journal is a member of the *'Committee on Publication Ethics'***

**Online ISSN:**2584-184X

*Research Article*

# अर्वाचीन-स्त्रीप्रधानमहाकाव्येषु 'विन्ध्यवासिनीविजयस्य' वैशिष्ट्यम्

**गरिमा मिश्रा**

शोध छात्रा, साहित्य विभाग, जगद्गुरु रामानन्दाचार्य राजस्थान, संस्कृत विश्वविद्यालय, जयपुर, राजस्थान, भारत

**Corresponding Author:** *गरिमा मिश्रा

**DOI:** https://doi.org/10.5281/zenodo.20406546

## सारांश

संस्कृतसाहित्यस्य सुदीर्घायां परम्परायां महाकाव्यं प्रधानविधा वर्तते। प्राचीनकाले नायकप्रधानकाव्यानां बाहुल्यम् आसीत्, किन्तु आधुनिकयुगे संस्कृतलेखने विस्मयकरं परिवर्तनं दृश्यते। साम्प्रतिककाले पौराणिक-ऐतिहासिक-सामाजिकविषयान् आधृत्य नारीपात्राणि नायकपदे (प्रधानभूमिकायां) प्रतिष्ठितवन्तः कवयः।

अस्मिन् शोधपत्रे आधुनिकसंस्कृतसाहित्यस्य प्रमुख-स्त्रीप्रधानमहाकाव्यानां— यथा 'उत्तरसीताचरितम्', 'जानकीजीवनम्', 'यशोधरा', 'झाँसीश्वरीचरितम्' इत्यादीनां संक्षिप्तं विवेचनं कुर्वन् महाकवि-वसन्ता-त्र्यम्बक-शेवडे महोदयस्य 'विन्ध्यवासिनीविजयम्' इति महाकाव्यस्य वैशिष्ट्यं प्रतिपादितम्।

यत्र सीता-यशोधरा-उर्मिलादयः नायिकाः स्वाभिमान-धैर्य-सङ्घर्षाणां मानवीरूपं प्रतिबिम्बयन्ति, तत्र 'विन्ध्यवासिनीविजयम्' महाकाव्यस्य नायिका साक्षात् आदिशक्तिः अस्ति। अत्र देवी विन्ध्यवासिनी त्रिगुणात्मिका, ब्रह्मा-विष्णु-महेशानां प्रेरिका, त्रैलोक्यस्य कष्टनिवारिणी च चित्रिता। सा केवलं संहारिणी न, अपितु 'तनुमती करुणा' अस्ति। महाकविना प्राचीनतन्त्रशास्त्राणां पौराणिकदृष्ट्या च आधुनिकनारीशक्तेः दिव्यस्वरूपस्य सुन्दरः समन्वयः विहितः।

अस्य अध्ययनस्य निष्कर्षोऽस्ति यत् 'विन्ध्यवासिनीविजयम्' स्वस्य आध्यात्मिक-गहनतायाः लोककल्याणकारि-दृष्टिकोणस्य च कारणात् अद्वितीयं वर्तते। यत्र अन्याः नायिकाः मर्यादारक्षणे व्यापृताः, तत्र विन्ध्यवासिनी जगन्मातृत्वेन समग्रसृष्टेः सञ्चालनम् उद्बोधनञ्च करोति। अतः आधुनिक-संस्कृत-साहित्ये एतत् महाकाव्यं नारीशक्तेः सर्वोच्चं सोपानम् इति सिद्धम्।

**Manuscript Information**

- **ISSN No:** 2584-184X
- **Received:** 04-04-2026
- **Accepted:** 24-05-2026
- **Published:** 27-05-2026
- **MRR:**4(5); 2026: 298-302
- **©2026, All Rights Reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

**How to Cite this Article**

गरिमा मिश्रा. अर्वाचीन-स्त्रीप्रधानमहाकाव्येषु 'विन्ध्यवासिनीविजयस्य' वैशिष्ट्यम्". Indian J Mod Res Rev. 2026;4(5):298-302.

**Access this Article Online**

www.mrrjournal.in

**प्रमुख शब्दाः** आधुनिक-संस्कृत-महाकाव्यम्, स्त्रीप्रधानकाव्यम्, विन्ध्यवासिनीविजयम्, नारीचेतना, वसन्त-त्र्यम्बक-शेवडे, आदिशक्तिः।


© 2026 गरिमा मिश्रा. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

**प्रस्तावना**

संस्कृतसाहित्यस्य गौरवपूर्णपरम्परायां महाकाव्यानां विशेषस्थानं वर्तते। वाल्मीकिः, वेदव्यासः, कालिदासः इत्यादिभिः लिखितैः महाकाव्यैः कीर्तिकौमुदी सर्वत्रिकीकरणे विशेष योगदानमस्ति ।

कालपरिवर्तनेन सह महाकाव्यस्य स्वरूपं तथा तस्य रचनायाः मापदण्डाः अपि परिवर्तिताः यतः परिवर्तनं सृष्टेः नियमः एव । आधुनिक युगं संस्कृतस्य निर्मातुः दृष्ट्या स्वर्णयुगं वक्तुं शक्यते। यतः आधुनिकयुगे महाकाव्य-खण्डकाव्य-गीतिकाव्य-नाट्यादीनां प्राचीन विधानां लक्षणं युगानुरूपं किञ्चित् परिवर्तनं कृत्वा नूतनरूपेण प्रस्तुतं कुर्वन्ति। अर्वाचीनमहाकाव्येषु पौराणिक ऐतिहासिकविषयैः सह आधुनिकविषयाणामपि संयोजनं क्रियते । आधुनिककविभिः महाकाव्य रचनाक्षेत्रे विविधराजनैतिक-सामाजिक-धार्मिकादिविषयेषु महाकाव्यं रचितम् । अनेके आधुनिककवयः स्वमहाकाव्येषु नारीं प्रमुखस्थानं दत्तवन्तः ।

संस्कृतसाहित्यशास्त्रे महाकाव्यस्य लक्षणेषु प्रायः 'धीरोदात्त-नायकस्य' प्रधानता स्वीकृता अस्ति। तथापि महाकविभिः स्वप्रतिभया नारी-पात्राणां चरित्रेषु अपि तादृशं पाण्डित्यं, शौर्यं, त्यागं च निरूपितं, येन महाकाव्यस्य कलेवरं केवलं 'पुरुष-प्रधानं' न तिष्ठति। विशेषतः आधुनिक-संस्कृत-साहित्ते स्त्री-चेतनायाः प्रभावः अतीव प्रखरः वर्तते। स्त्रीचरितप्रधानमहाकाव्यानि संस्कृत-वाङ्मये नूतनं कीर्तिमानं स्थापयन्ति। एतानि। काव्यानि नायकस्य परिभाषां विस्तारायन्ति तथा च 'यत्र नार्यस्तु पूज्यन्ते' इति सूक्तिं साहित्यिक-धरातले चरितार्थं कुर्वन्ति। शास्त्रीय-परम्परायाः पालनेन सह आधुनिक-बोधस्य समावेशः एव एतेषां काव्यानां मुख्यं वैशिष्ट्यमस्ति।

**तुलनात्मकविवेचनम् -**

आधुनिकसंस्कृतकाव्यजगति नारीपात्राणां नायकत्वं प्रतिष्ठापयितुं बहवः महाकाव्याः विरचिताः, येषां केषाञ्चित् महाकाव्यानां संक्षिप्तं विवेचनम् अत्र प्रस्तूयते।

**१. उत्तरसीताचरितम् –**

दशसर्गात्मकस्य उत्तरसीताचरितमहाकाव्यस्य प्रणेता डॉ. रेवाप्रसाद द्विवेदीः इति प्रसिद्धः विद्वान् अस्ति। अस्मिन् महाकाव्ये समग्रतः षट्शतानि चतुःनवतिश्च श्लोकाः सन्ति। सीताचरितम् नामैतत् महाकाव्यं रामकथाम् आधारीकृत्य विरचितं संस्कृतसाहित्यस्य नारीप्रधानं विशिष्टं महाकाव्यमस्ति। अत्र काव्ये श्रीरामस्य राज्याभिषेकात् आरभ्य जानक्याः सीतायाः पातालप्रवेशपर्यन्तः समग्रः आख्यानक्रमः अत्यन्तं सुसम्बद्धतया, मार्मिकतया च निरूपितः अस्ति।

सीता एव अस्य महाकाव्यस्य प्रधाननायिका विराजते। तस्याः पावनं चरित्रं आधुनिकयुगीननारीचेतनानुरूपेण नूतनया दृष्ट्या अत्यन्तं कौशलपूर्वकं निरूपितमस्ति।

अस्य महाकाव्यस्य मूलाधारः वाल्मीकिप्रणीतस्य रामायणस्य उत्तरकाण्डः एव; तथापि महाकविना स्वस्य नित्यनवोन्मेषशालिन्या प्रतिभया सीताचरित्रं सीतानिर्वासनप्रसङ्गं च सर्वथा अभिनवेन रूपेण पुनर्निर्मितम्। अनेन तस्याः चरित्रे दिव्यता, नव्यता च समुज्ज्वलतया प्रकाशिता।

विशेषतः सीतानिर्वासनप्रसङ्गे कविना अभिनवा कल्पना विन्यस्ता—यत्र सीता स्वयमेव रामेण सह मार्मिकं संवादं विधाय तस्य अन्तःकरणस्थितान् सूक्ष्मान् मनोभावान् सम्यगवलोक्य, लोकापवादभयात् प्रजापालकस्य श्रीरामस्य संरक्षणार्थं स्वयमेव वनगमनाय धैर्येण समुत्सुका भवति।

**प्राणतोपि यशसि स्पृहा गुरुः सूर्यवशिषु हि या प्रशस्यते।**
**तां विभाण्य कलुषा स्नुषाऽद्य वो यात्रि दूरमनुमन्यतान्तमाम् ।। १**

एवं सीता न केवलं पतिव्रता, अपि तु स्वाभिमानसमन्विता, धैर्यशालिनी, स्वनिर्णयसमर्था च नारीरूपेण अत्र सजीवम् अवतारिताऽस्ति। कविना सीतायाः माध्यमेन आत्मनिर्भरता, आत्मबलं तथा आत्मविश्वासः इत्येषां गुणानां प्रमुखतया सुस्पष्टं चित्रणं कृतम्।

**२. जानकीजीवनम् –**

अभिराजराजेन्द्रमिश्रेण जानकीजीवनम् नाम महाकाव्यं विरचितम्, यस्मिन् वाल्मीकिप्रणीतरामायणस्य षट्काण्डानां कथाम् आधारीकृत्य अभिनवा रचना विधायिता। एतत् महाकाव्यं एकविंशतिसर्गेषु निबद्धम् अस्ति। कविना प्रथमसर्गात् आरभ्य एकविंशतितमसर्गपर्यन्तं सीतायाः जीवनस्य सर्वेऽपि आयामाः सूक्ष्मतया, सम्यक्तया च निरूपिताः।

वाल्मीकिकृतरामायणकथाम् आधृत्य अपि महाकविना स्वकीयेन गम्भीरेण चिन्तनेन, कठिनपरिश्रमेण च, अद्यावधि प्रश्नचिह्नैः आवेष्टितस्य सीतानिर्वासनप्रसङ्गस्य परम्परागतस्वीकारोक्तिं निराकृत्य, सहस्राब्दिपर्यन्तं प्रवहमानां रामकथापरम्पराम् अनुसृत्य, तामेव कथां स्वस्य अलौकिकदिव्यप्रतिभया नवीनरूपेण पुनः संरच्य प्रस्तुता।

काव्येऽस्मिन् आधुनिकनारीवादीचिन्तनम्, नारीचेतना, नारी-अस्मिता च प्रमुखतया परिलक्ष्यन्ते। कविना मौलिक-उद्भावनाभिः, नवीनकल्पनाभिः च एषा कथा अभिनवरूपेण विन्यस्ता, यत्र सीतायाः व्यक्तित्वं केवलं पारम्परिकमर्यादायाः परिसीमायां न स्थाप्यते, अपितु स्वाभिमान-स्वातन्त्र्य-चेतनायाः प्रतीकरूपेण प्रतिष्ठाप्यते।

महाकविना सीतानिर्वासनविषये उत्पन्नानां नानाविप्रतिपत्तीनां समुचितं समाधानं कृतम्, तथा च नारीजातेरस्मिता सुदृढतया प्रतिष्ठापिता। तथापि सः वाल्मीकिप्रणीतरामायणस्य अवहेलनां न कृत्वा, तस्याः परम्परायाः आदरं वहन्, नवीनरामकथापरम्परायाः सृजनं कृतवान् इति स्पष्टं भवति। महाकविना सीतायाः व्यक्तित्वं सशक्तं तेजस्विन्याः च रूपेण अत्यन्तं प्रभावकारितया निरूपितम्। पञ्चदशसर्गे विशेषतया तस्याः दीप्तं तेजस्विरूपं सुस्पष्टतया आरेखितमस्ति।

**जिता समर्प्येत धराऽथवा स्वयं नृपेण भुज्येत चिराय राघव।**
**न किन्तु भार्या रिपुहस्तमोचिता वितीर्यते ह्यत्र परत्र सत्रिणी ।। २**

अत्र सीताया रामं प्रति गर्हणात्मकाः उक्तयः तस्याः ओजस्विनं, स्वाभिमानसमन्वितं च स्वरूपं द्योतयन्ति। सा न केवलं पतिव्रता, अपि तु आत्मगौरवसंरक्षणे दृढनिश्चया, निर्भया च नारी इति प्रकाशते।

**३. यशोधरामहाकाव्यम् –**

विंशतिसर्गात्मकम् अस्य महाकाव्यस्य प्रणेता पण्डितः ओगेति परीक्षित शर्मा इति विख्यातः कविः अस्ति। महात्मनः गौतमबुद्धस्य अभिनिष्क्रमणकथाम् आश्रित्य अद्यावधि संस्कृतमहाकाव्यपरम्परायां


© 2026 गरिमा मिश्रा. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

अप्रकाशितस्य यशोधरायाः चरितस्य वर्णनं कृत्वा कविना संस्कृतसाहित्यस्य श्रीवृद्धिः साधिता।
अस्य काव्यस्य प्रमुखपात्रं यशोधरा अस्ति, या धीरोदात्तगुणैः मण्डिता विराजते। यद्यपि गौतमस्य निर्वेदभावस्य अपि अत्र विशिष्टतया चित्रणं कृतम्, तथापि चरितनायिकायाः यशोधरायाः आश्रयीभूतः करुणरसः अपेक्षया विस्तृततया, मार्मिकतया च अभिव्यक्तः दृश्यते।

**कियेतवाश्चर्यमहो धरित्रयां स्त्रीणां मनोवृत्तिरगम्य एव।**
**पयोधीरक्षीरकृतः सुजीवाः क्षेणेत नेत्रांचल साश्रुपाता।।** [३]

कविना यशोधरायाः अन्तःकरणस्थितं गूढं मर्म अत्यन्तं हृदयस्पर्शिन्या शैलीया प्रकाश्यते, यत्र तस्याः विरहवेदना, धैर्यं, त्यागभावः च सम्यग् अनुभाव्यन्ते।

**४. वैदेहीचरितम् –**
वैदेहीचरितम् नाम्ना महाकाव्यं रामचन्द्रमिश्रेण विरचितमस्ति। ग्रन्थेऽस्मिन् दशसर्गाः वर्तन्ते। महाकविः मिश्रः सामान्यकथाप्रसङ्गे किमपि विशेषपरिवर्तनं न कृतवान्। तस्य मुख्यं लक्ष्यं वैदेह्याः पावनचरितस्य उपस्थापनमेव अस्ति, अतः सः रामकथायाः तान् प्रसङ्गानेव स्वीकृतवान् ये सीतया सह सम्बद्धाः सन्ति। अस्मिन् काव्ये रामस्य चरितं किञ्चित् गुणीभूतं प्रतिभाति।

**५. अपराजितावधूमहाकाव्यम् –**
अपराजितावधूमहाकाव्यम्' इति कृतेः रचयिता डॉ. पूर्णचन्द्र शास्त्री महोदयः वर्तते। महाकाव्येऽस्मिन् दशसर्गाः तथा च षट्शतं श्लोकाः सन्ति।
अस्य महाकाव्यस्य नायिका 'प्रभा' अस्ति, या छत्तीसगढ़राज्यस्य कस्यचित् कृषककुलस्य वधूं प्रतिधत्ते। महाकाव्यस्य कथानकस्य केषुचित् अंशेषु नायिका स्वयं मुखेन स्वकीयां दयां वर्णयति, किन्तु अधिकांशः भागः कविना एव निरूपितः अस्ति। अस्मिन् काव्ये पुरुषप्रधाने समाजे नारीजीवनस्य दुरावस्थायाः कारुणिककथायाः तस्याः संघर्षमयगौरवगाथायाश्च मार्मिकं चित्रणं विहितम्। द्वितीयसर्गे कविना नारीपुरुषयोः सामाजिकां विषमतां वैलक्षण्येन समलङ्कृत्य निरूपितम्। तद्यथा –

**यदि भवेद समर्थतरः वतिस्वदपि सा भवतीह सुसेविका।**
**हृदयशोषिविडम्बनयावृतं ननु पतिव्रतमेव परम्परा ।।** [४]

अपराजितावधूमहाकाव्यस्य नायिका प्रभा यद्यपि अनेककष्टैः पीडिता वर्तते, तथापि सा अत्याचारस्य प्रतिकारं कुर्वती एका ओजस्विनी नायिका रूपेण चित्रिता। किन्तु यदा स्वपत्युः द्वितीयविवाहस्य अथवा सपत्न्याः गृह-आगमनस्य प्रसङ्गः आयाति, तदा कविः तस्याः चरित्रे कामपि अन्यां विलक्षणाम् एव दिशं प्रदत्तवान्, येन तस्याः व्यक्तित्वस्य नूतनः पक्षः उन्मीलितः भवति।

**६. झाँसीश्वरीचरितम् –**
अस्य महाकाव्यस्य रचनाकारः सुबोधचन्द्रपन्तः महोदयः अस्ति। महाकाव्येऽस्मिन् द्वाविंशतिसर्गाः सप्तसप्तत्यधिकचतुर्दशशतं (१४७७) श्लोकाश्च सन्ति। अत्र झाँसी-राज्ञ्याः लक्ष्म्याः जीवनचरित्रस्य मर्मस्पर्शिचित्रणं कृतमस्ति। अनेन पाठकानां हृदयेषु देशभक्तेः भावनायाः सञ्चारः भवति। कविः राज्ञीं लक्ष्मीबाईं भगवत्याः दुर्गायाः अवतारत्वेन मन्यते।
महाकाव्यस्यास्य आरम्भः भगवत्याः दुर्गायाः स्तुत्या अभवत्। लक्ष्मीबाई केवलं सामान्या नारी नास्ति, अपितु कविना सा समस्तशक्तीनां पुञ्जस्वरूपिणी स्वीकृता अस्ति।

**ज्योतीषि सम्भूय समानितानि केन्द्रे महाशक्ति युतान्यभूवन्,**
**देशो यथाऽयं जडता रतोभाद् दीपो धृतस्नेह इव प्रशाम्यन् ।।**
**तान्येव लक्ष्मीरिति जन्मलेभे लक्ष्याश्च चण्ड्याश्च विमिश्रितं या,**
**युद्धे मुनि प्राणवसूडुपाख्य ईशाब्द ऐते प्रसिता बभूव ।।** [५]

अस्य महाकाव्यस्य अन्तिमसर्गे वीराङ्गनायै श्रद्धासुमानि अर्पितानि। भारतीयस्वतन्त्रतासङ्ग्रामस्य सिद्धौ तस्याः अवदानं सादरं निगदितम्। तस्यै कृतज्ञतां ज्ञापयित्वा तस्याः राष्ट्रभक्तिपूर्णजीवनं देशवासिभ्यः शाश्वतप्रेरणास्रोतं भूयात् इति मङ्गलाशा प्रकटिता।

**७. इंदिरागांधीचरितम् –**
अस्य महाकाव्यस्य रचयिता डॉ. सत्यव्रतशास्त्री महोदयः अस्ति। अस्मिन् ग्रन्थे पञ्चविंशतिसर्गाः सन्ति। अस्मिन् महाकाव्ये पण्डितजवाहरलालनेहरूवर्यस्य सुपुत्र्याः श्रीमत्याः इन्दिरागाँध्याः जीवनचरितं वर्णितमस्ति।
कथावस्तुनः पोषणाय पण्डितमोतीलालनेहरू-श्रीमतीविजयलक्ष्मी-पण्डितजवाहरलालनेहरू-श्रीमतीकमलानेहरू-प्रभृतीनां पात्राणामपि वर्णनं कृतम्। आङ्ग्लशासकानां दासतापाशात् भारतमातुः मुक्तये इन्दिरागाँध्या कृतानां प्रयत्नानां विशदं चित्रणम् अत्र लभते। भारतं भारतीयसंस्कृतिं च प्रति महती श्रद्धा प्रकटीकृता।
काव्येऽस्मिन् इन्दिरायाः फिरोजगाँधिना सह परिणयस्य तथा च नवदम्पत्योः भारतस्य स्वातन्त्र्यान्दोलने महत्त्वपूर्णभूमिकायाः सविस्तरं वर्णनं विद्यते। इन्दिरा भारतस्य प्रधानमन्त्रीपदं समलङ्कृतवती। तस्याः शासनकालं 'आधुनिकभारतस्य आधारशिला' इति कथ्यते चेत् नात्र अतिशयोक्तिः। इयं विदुषी 'भारतरत्नम्' इति सर्वोच्चालङ्कारेण विभूषिता।

**८. इन्दिराजीवनम् –**
अर्वाचीनसंस्कृतसाहित्यस्य महनीयं शिल्पं वर्तते 'इन्दिराजीवनम्' इति महाकाव्यम्। अत्र स्वातन्त्र्योत्तर-भारतस्य समुन्नयने श्रीमती-इन्दिरागान्ध्याः राजीवगान्धेः च योगदानं तयोः राष्ट्राय आत्मोत्सर्गश्च सुचारुतया उपनिबद्धः। एकोनविंशतिसर्गात्मकेऽस्मिन् महाकाव्ये सप्तशतं सप्तदश (७१७) श्लोकाः विद्यन्ते। अस्य कालजयिनः काव्यस्य रचयिता सुप्रसिद्धः विद्वान् डॉ. गोस्वामी बलभद्रप्रसादशास्त्री महोदयः वर्तते।

**९. श्रीराधाचरितमहाकाव्यम् –**
विंशशताब्द्यां महाकविना डॉ. हरिनारायणदीक्षितेन विरचितं 'श्रीराधाचरितमहाकाव्यम्' आधुनिकसंस्कृतसाहित्यस्य एका विशिष्टा कृतिरस्ति। अस्मिन् महाकाव्ये त्रयोदशसर्गेषु श्रीराधायाः दिव्यं पावनं च चरितं तथा च तस्याः ह्लादिनीशक्तेः स्वरूपं सुविस्तृतं वर्णितम्। अत्र


© 2026 गरिमा मिश्रा. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

ग्रन्थे श्रीराधायाः नायिकारूपेण प्रतिष्ठापनं विधाय तस्याः धैर्यस्य, तपसः, श्रीकृष्णं प्रति तस्याः अनन्यप्रेमभक्तेश्च सजीवं चित्रणं कृतमस्ति।

**१०. गङ्गासागरीयम् –**

गङ्गासागरीयमहाकाव्यं संस्कृतसाहित्यस्य रूपकात्मकमेकमहाकाव्यमस्ति। पण्डितविष्णुदत्तशुक्लप्रणीतं महाकाव्यमिदं नायिकाप्रधानकाव्यदृष्ट्या अतिमहत्त्वपूर्णमस्ति । अस्य नारीप्रधानमेतन्महाकाव्यस्य कथावस्तु नवसर्गात्मक विद्यते । महाकाव्येऽस्मिन् गङ्गा केवलं नदीमात्रं न भूत्वा एकस्याः मानवीयनायिकायाः रूपेण चित्रिता अस्ति। सा अत्र रूपवती, गुणवती च अस्ति। प्रसादगुणसंवलितवैदर्भीरीत्या प्रणीतमेतत्सरलं राष्ट्रभक्तिपूर्णं महाकाव्यमस्ति। गङ्गामाध्यमेन कविः लोकाचारादिविषये स्वविचारं प्रस्तौति-

**श्रमेणैव सिध्यन्ति कार्याणि लोके श्रमेणैव लोकोत्तरत्वं सुलभ्यम् ।**
**श्रमेणैव चोत्कर्षतां यान्ति लोकाः श्रमं साधयध्व श्रमं साधयध्वम् ।।** [६]

**११. रुक्मिणीहरणम्**

रुक्मिणीहरणमहाकाव्यस्य प्रणेता श्रीकाशीनाथमहाभागः अस्ति। अस्य महाकाव्यस्य रचना श्रीमद्भागवतस्य दशमस्कन्धोत्तरार्द्धस्य द्वापञ्चाशत्तमतः चतुःपञ्चाशत्तमध्यायं यावत् वर्णितां कथामाश्रित्य कृताऽस्ति । काव्येऽस्मिन् रुक्मिण्याः पूर्वरागात् तस्या हरणं यावत् वर्णनमुपनिबद्धमस्ति। महाकाव्येऽस्मिन् एकविंशतिसर्गाः वर्तन्ते । रुक्मिणीवर्णनस्यैव प्रामुख्यमत्र वर्तते, रुक्मिण्या एव प्राधान्यामत्राऽस्ति अतो नारीप्रधानमेतत् काव्यमिति वक्तुं शक्यते । काव्यारम्भैव रुक्मिण्या वर्णनं कुर्वन् लिखति –

**कमले कमलेव नीरदे चपलेवाम्बुजिनीव पुष्करे ।**
**भवने किल तस्य रुक्मिणीत्यवतीर्णा स्वयमिन्दिराऽभवत् ।।** [७]

**१२. उर्मिलीयमहाकाव्यम् –**

उर्मिलीयमहाकाव्यप्रणेता श्रीनारायणशुक्लोऽस्ति। अस्य महाकाव्यं रामानुजस्य लक्ष्मणस्य पत्न्या उर्मिलायाः समग्रं जीवनमाश्रित्य प्रणीतमस्ति। अस्य कथावस्तु सप्तदशसर्गैर्विभक्तं। काव्येऽस्मिन् मूलकथायां न किमपि मौलिकं परिवर्तनमस्ति केवलं वस्तुनः परिवर्द्धनं दृश्यते। काव्येऽस्मिन् साकेतवत् सौमित्रिसुन्दरीचरितवद्वोमिलाया विरहव्यथा न चित्रिता नैव सा विंशशताब्दिसुलभवीरमणीवदेव प्रस्तुतीकृता । काव्येऽस्मिन् भारतीयसंस्कृतेः उच्चादर्शानां प्रतिष्ठा मुहुर्मुर्दृश्यते । उर्मिलायाः पतिगृहगमनकाले तस्या माता तामुपदिशन्ती वदति –

**परोक्तितैक्ष्ण्यं मृदुतां सहस्त्व वचः स्वकीयं मधुरं प्रयुङ्क्ष ।**
**क्षततरूरोहति शस्त्रसंधेर्वचो हतं नो पुनरेति सन्धिम् ।।** [८]

**१३. सावित्रीचरितम् –**

पण्डितआत्मारामशास्त्रिणा विरचितं 'सावित्रीचरितम्' आधुनिकसंस्कृतसाहित्यस्य एकं वैशिष्ट्यपूर्णं महाकाव्यमस्ति। अस्य महाकाव्यस्य मूलकथा महाभारते वर्णितया 'सावित्री-सत्यवद्-उपाख्यानेन' सम्बद्धा अस्ति। अस्मिन् सावित्र्याः जन्म, सत्यवतः चयनं, वैवाहिकजीवनं, ततः परं च स्वप्रज्ञाबलेन यमराजात् पत्युः प्राणरक्षणं वर्णितमस्ति।

काव्येऽस्मिन् सावित्री एव आधारभूता अस्ति। काव्यस्य आरम्भात् अन्तपर्यन्तं सावित्र्याः एव चरितं, संकल्पः, क्रियाशीलता च वर्णिता अस्ति। अतः इयं कथा 'नायिका-प्रधाना' वर्तते। सावित्रीचरितमहाकाव्यं न केवलं नारीशक्तिं प्रदर्शयति, अपितु धर्मस्य अधर्मस्य उपरि विजयं, दृढसङ्कल्पस्य च महिमानं प्रतिपादयति।

**काव्यवैशिष्ट्यम् –**

संस्कृते रचितानि सर्वाणि नारीप्रधानानि महाकाव्यानि महत्तरपुण्यानि सन्ति, यतोहि एतेषु सर्वेषु कश्चन विशिष्टः दृष्टिकोणः उपस्थापितः। वस्तुतः प्राचीनकालादेव कविभिः स्वकाव्येषु नार्याः विविधानां रूपाणां वर्णनं विहितम्। वैदिककाले नार्याः स्थानम् अत्यन्तं महत्त्वपूर्णं गौरवपूर्णं च आसीत् —

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।** [९]

आधुनिककालेऽपि नारीं प्रति गौरवपूर्णभावनायाः विकासः जायमानः वर्तते। अत्र तावत् जननी सर्वोपरि गुरुः मन्यते — 'नास्ति मातृसमो गुरुः'। अस्याः भावनायाः चरमोत्कर्षः नार्याः देवीरूपेण प्रतिष्ठापने अभवत्। महाकविः शेवडे-महोदयः प्राचीनतन्त्रशास्त्राणाम् आश्रयं गृहीत्वा नारीं मातृरूपेण, आदिशक्तिरूपेण, तथा च ब्रह्मा-विष्णु-महेश-त्रिदेवाणां प्रेरिकाशक्तिरूपेण निरूपितवान्। 'शक्त्याः उपरि किमपि नास्ति' इत्येव महाकवेः शेवडेमहोदयस्य वैशिष्ट्यं वर्तते।

संस्कृतसाहित्ये नारीं नायकपदे प्रतिष्ठापयत्सु सर्वेषु महाकाव्येषु नार्याः चरित्रचित्रणमेव मुख्यतया कृतम्। महाकविभिः ऐतिहासिकाः, पौराणिकाः, देवकोटिस्थाः, सामान्याश्च नार्यः स्व-स्वकाव्यानां आधारभूताः कृताः। उपर्युक्तवर्णितनारीप्रधानमहाकाव्येषु नार्याः भूमिका विविधाकारेण प्रतिपादिता।

किन्तु 'विन्ध्यवासिनीविजयम्' इति महाकाव्यस्य नायिका जगदम्बा विन्ध्यवासिनी सर्वेषां कष्टपरम्पराणां समूलोच्छेदिका, व्यथाहारिणी च वर्तते। सा वसुदेव-देवकीभ्यां सह त्रैलोक्यस्य कष्टनिवारणाय विष्णुं अवतारग्रहणार्थं प्रेरयति। महाकाव्यस्य नायिकायाः जगदम्बायाः चरित्रस्य समुत्कर्षः एतेषु पद्येषु द्रष्टुं शक्यते।

**सांख्या वदन्ति भवतीं प्रकृक्तिं पुराणा वेदान्तितः श्रुतिमतां कथयन्ति मायाम्।**

**शक्तिं परां पशुपतेर्निंगदन्ति शैवा अस्मत्कृते तनुमती करूणा त्वमेव ।।** [१०]

**विद्यां पुरा त्रिपुरभैरवि तावकीनामाराध्य पञ्चदशवर्णमयीं मुकुन्दः।**
**दैत्यानुप्लवकरानिव विप्रलब्धुं त्रैलोक्यमोहनमपद्यत रूपधेयम् ।।** [११]

## निष्कर्ष

अस्य अध्ययनस्य निष्कर्षोऽस्ति यत् 'विन्ध्यवासिनीविजयम्' स्वस्य आध्यात्मिक-गहनतायाः लोककल्याणकारि-दृष्टिकोणस्य च कारणात् अद्वितीयं वर्तते। यत्र अन्याः नायिकाः मर्यादारक्षणे व्यापृताः, तत्र


© 2026 गरिमा मिश्रा. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

विन्ध्यवासिनी जगन्मातृत्वेन समग्रसृष्टेः सञ्चालनम् उद्बोधनञ्च करोति। अतः आधुनिक-संस्कृत-साहित्ये एतत् महाकाव्यं नारीशक्तेः सर्वोच्चसोपानम् इति सिद्धम्।

## सन्दर्भ सूची


१. रेवाप्रसाद द्विवेदी,उत्तरसीताचरितम्, 3/25
२. अभिराज डॉ. राजेंद्रमिश्र: जानकीजीवनम्,15/46
३. पं. ओगेटि शर्मा, यशोधरामहाकाव्यम्,10/11
४. डॉ.पूर्णचन्द्र शास्त्री, अपरिजितावधूमहाकाव्यम् ,2/28
५. सुबोधचंद पंत, झांसीश्वरीचरितम्,1724,26
६. पं. विष्णुदत्तशुक्ल: गङ्गासागरीयम्,5/28
७. श्रीकाशीनाथ:, रुक्मिणीहरणम्,1/3
८. श्रीनारायणशुक्ल:, उर्मिलीयमहाकाव्यम्,6/5
९. मनुस्मृति, 3/56
१०. श्रीवसन्तत्र्यम्बकशेवडे, विन्ध्यवासिनीविजयम्,9/43
११. श्रीवसन्तत्र्यम्बकशेवडे, विन्ध्यवासिनीविजयम्,9/48



**Creative Commons License**

This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–Non-commercial–No Derivatives 4.0 International (CC BY-NC-ND 4.0) License. This license permits users to copy and redistribute the material in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and the source. No modifications, adaptations, or derivative works are permitted.



**About the Corresponding Author**



**गरिमा मिश्रा** संस्कृत साहित्य की शोधार्थी हैं। वे जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय, जयपुर में साहित्य विभाग में शोध कार्य कर रही हैं। उनकी शैक्षणिक रुचियाँ संस्कृत साहित्य, भारतीय संस्कृति, काव्यशास्त्र तथा पारंपरिक ज्ञान परंपरा के अध्ययन एवं अनुसंधान से संबंधित हैं।




© 2026 गरिमा मिश्रा. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/